**अपाक्तात्** अव्य० अपाची अवाची प्रतीची वा बा० तातिल् १अवाच्याः २प्रतीच्या वा इत्यर्थे "प्राक्तादपाक्तादधरादुदक्तादभि ऋ०७,१०४।१९ । अपाक्तात् प्रतीच्या इति भा०।

**अपाक्ष** न० अपगतमनुगतमक्षमिन्द्रियम् अत्या० स० । १ इन्द्रियसन्निकर्षजे प्रत्यक्षे २ तद्विषये त्रि० त्रिका० ।

**अपाङ्क्तेय** त्रि० सद्भिः सह भोजने पङ्क्तिमर्हति अर्हार्थे ढक् न०त० । १ सद्भिः सह एकपङ्क्तौ भोजनानर्हे स्तेनपतितादौ । अत्र ष्यञि अपाङ्क्त्य इत्यपि । ते च मनौ दर्शिताः यथा "ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः । तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत् ॥ जटिलं चानधीयानं दुर्बलं कितवं तथा । याजयन्ति च ये पूगांस्तांश्च श्राद्धे न भोजयेत् ॥ चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा । विपणेन च जीवन्तोवर्ज्याः स्युर्हव्यकव्ययोः । प्रेष्यो ग्रामस्य राज्ञश्च कुनखी श्यावदन्तकः । प्रतिरोद्धा गुरोश्चैव त्यक्ताग्निर्वार्द्धुषिस्तथा ॥ यक्ष्मी च पशुपालश्च परिवेत्ता निराकृतिः । ब्रह्मद्विट् परिवित्तिश्च गणाभ्यन्तर एव च ॥ कुशीलवोऽवकीर्णी च वृषलीपतिरेव च । पौनर्भवश्च काणश्च यस्य चोपपतिर्गृहे ॥ भृतकाध्यापको यश्च भृतकाध्यापितस्तथा । शूद्रशिष्यो गुरुश्चैव वाग्दुष्टः कुण्डगोलकौ ॥ अकारणपरित्यक्ता मातापित्रोर्गुरोस्तथा । ब्राह्मैर्यौनैश्च सम्बन्धैः संयोगं पतितैर्गतः ॥ अगारदाही गरदः कुण्डाशी सोमविक्रयी । समुद्रयायी वन्दी च तैलिकः कूटकारकः ॥ पित्रा विवदमानश्च कितवो मद्यपस्तथा । पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी ॥ धनुःशराणां कर्त्ता च यश्चाग्रेदिधिषूपतिः । मित्रध्रुग्द्यूतवृत्तिश्च पुत्राचार्यस्तथैव च ॥ भ्रामरी गण्डमाली च श्वित्र्यथो पिशुनस्तथा । उन्मत्तोऽन्धश्च वर्ज्याः स्युर्वेदनिन्दक एव च ॥ हस्तिगोऽश्वोष्ट्रदमको नक्षत्रैर्यश्च जीवति । पक्षिणां पोषको यश्च युद्धाचार्यस्तथैव च ॥ स्रोतसां भेदको यश्च तेषां च पोषणे रतः । गृहसंवेशको दूतो वृक्षारोपक एव च ॥ श्वक्रीड़ी श्येनजीवी च कन्यादूषक एव च । हिंस्रो वृषलवृत्तिश्च गणानां चैव याजकः ॥ आचारहीनः क्लीवश्च नित्यं याचनकस्तथा । कृषिजीवी श्लीपदी च सद्भिर्निन्दित एव च ॥ औरभ्रिको माहिषिकः परपूर्वापतिस्तथा । प्रेतनिर्हारकश्चैव वर्जनीयाः प्रयत्नतः ॥ एतान् विगर्हिताचारानपाङ्क्तेयान् द्विजाधमान् । द्विजातिप्रवरोविद्वानुभयत्र विवर्जयेत् । ब्राह्मणस्त्वनधीयानस्तृणाग्निरिव शाम्यति । तस्मै हव्यं न दातव्यं न हि भस्मनि हूयते ॥ अपाङ्क्त्यदाने यो दातुर्भवत्यूर्द्ध्वं फलोदयः । दैवे हविषि पित्र्ये वा तत्प्रवक्ष्याम्यशेषतः ॥ अव्रतैर्यद्द्विजैर्भुक्तं परिवेत्त्रादिभिस्तथा । अपाङ्क्तैर्यदन्यैश्च तद्वै रक्षांसि भुञ्जते" इति ॥

**अपाङ्क्त्य** त्रि० न पङ्क्तिमर्हति यत् न०त०। १ अपाङ्क्तेये । "अपाङ्क्त्यदाने योदातुरिति" मनुः ।

**अपाङ्ग** पु० अपाङ्गति तिर्य्यक् चलति नेत्रं यत्र अप+अङ्ग घञ् । १नेत्रप्रान्ते, "अजनि पङ्कुरपाङ्गनिजाङ्गणभ्रमिकणेऽपि तदीक्षणखञ्जन" इति नैष० २ तिलके च । अपगतमङ्गं यस्य प्रा० ब० । ३ अङ्गहीने त्रि० स्त्रियां ङीप् ।

**अपाङ्गक** पु० अपकृष्टमङ्गं यस्य वा कप् । (आपाङ्) इति ख्याते अपामार्गे । स्वार्थे कन् १ नेत्रान्ते पु० । २ अपगताङ्गे त्रि० ।

**अपाङ्गदर्शन** न० अपाङ्गेन नेत्रान्तेन दर्शनं ३त०। १ कटाक्षे

**अपाङ्गनेत्र** न० अपाङ्गं देशं व्याप्य नेत्रम् । १ दीर्घनेत्रे ।

**अपाच्** त्रि० अपाञ्चति अप+अन्च–क्विप् । १ अपगमनकर्त्तरि २ अप्रकाशार्थे च । स्त्रियां ङीप् । सा च ३ दक्षिणस्यां दिशि, ४ प्रतीच्यामिति वेदभाष्ये माधवः । "प्राक्तादपाक्तादधरादिति ऋ०७,१०४,१९ "अपाक्तात् प्रतीच्या" इति तेन व्याख्यानात् । तत्र पदान्तरेण दक्षिणप्रतीतेरपाक्शब्दस्य प्रतीच्यां लक्षणैव न तत्रशक्तिरिति तु युक्तम् ।

**अपाचीन** त्रि० अपाच्यां दक्षिणस्यां भवः ख । १ दक्षिणदिग्भवे २ अप्रकाशमाने च । "योहप्रपाचीने तमसि मदन्तीरिति" ऋ० ७,६,४, 'अपाचीने अप्रकाशमाने" भा० ।

**अपाच्य** त्रि० अपाच्यां भवः "द्युप्रागित्या०" पा० यत् । १ दक्षिणदिग्भवे पदार्थे "ये के च नीच्यानां राजानो ये अपाच्यानामिति" ऐत० ब्रा० ।

**अपाटव** न० पाटवं पटुता पटु+भावेऽण् नास्ति तद्यत्र । १ रोगे । न०त० ।२ पटुताभावे 'अपाटवाद्यशौचाद्यैर्यदि विघ्नं प्रजायते" इति स्मृतिः । ६ब० । ३ पटुताशून्ये त्रि०

**अपात्त** त्रि० अप+आ+दा–क्त । १ प्राप्ते । 'सहोवाच विज्ञायते नास्ति हिरण्यस्यापात्तमिति" छ०उ० । "अपात्तं प्राप्तमिति" भा० ।

**अपात्र** न० पात्रं श्राद्धभोजनदानादियोग्यं न०त० । १ विद्यादिहीनेऽनाचारे, २ दानादियोग्यताहीने कुपात्रे, नटादौ च । दानादिपात्रञ्च पात्रशब्दे दर्शयिष्यते । "अदेशकाले यद्दानमपात्रेभ्यश्च दीयते । असत्कृतमवज्ञातं तत्तामसमुदाहृतमिति" गीता 'अपात्रेषु च यद्दत्तं तत् सर्वं विफलं भवेदिति" स्मृतिः "अपात्रे पात्रमित्युक्ते कार्य्ये वा धर्म्मसंहिते" इति मिताक्षरायां नारदः ।